# MASTER OF ARTS EXAMINATION, 2023

(1st Year, 2nd Semester)

## SANSKRIT

## COURSE – VIII

## [ SANSKRIT DRAMA ]

Time : Two hours | Full Marks : 30

*The figures in the margin indicate full marks.*

### क-विभागः

१. 'एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यम्'। कस्मिन् प्रसङ्गे कस्या इयमुक्तिः ? तस्याः को दोहदोऽभवत् ? एतेन चित्रदर्शनेन किं नाटकीयतात्पर्यं साधितम् ? 1+0.5+1+4.5

अथवा

'उत्तररामचरितम्' इति नाटकस्य प्रथमाङ्के सीतानिर्वासनादनन्तरं रामस्य कीदृशी मानसिकी अवस्था सञ्जाता ? तया रामचरित्रस्य कीदृशं माहात्म्यं प्रकटितम् ? 4.5+2.5

२. सुरगिरा देवनागर्या लिप्या च **चत्वारः** प्रश्नाः समाधेयाः। 1×4=4

क. जृम्भकास्त्राणां किं माहात्म्यम् ?

ख. कुशिकनन्दनः कः ? राम-सीतयोः वैवाहिकसम्बन्धे कुशिकनन्दनस्य का भूमिका आसीत् ?

ग. निषादपतिना सह रामस्य कुत्र समागमोऽभवत् ?

घ. शम्बुकः क आसीत् ?

ङ. चौलकर्म इत्यस्य कोऽर्थः ?

[ Turn over

३. सुरगिरा देवनागर्या लिप्या च सप्रसङ्गमेकस्य व्याख्या लेखनीया। 4

क) अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्॥

ख) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते॥

**ख-विभागः**

१. अधोलिखिताः प्रश्नाः सुरगिरा देवनागरीलिपिमाश्रित्य च समाधेयाः- $1\times5=5$

क. किमर्थं वसन्तसेना चारुदत्तस्य गृहं प्रविष्टा?

ख. विदूषकः रेभिलस्य संगीतं श्रुत्वा किमवदत्?

ग. चारुदत्तः कदा आत्मानम् अदरिद्रः इति कथयति?

घ. का तावत् धूता? तस्याः चरित्रस्य वैशिष्ट्यमेकम् उल्लेखनीयम्।

ङ. कदा संबाहकः वसन्तसेनायाः समीपे आगतवान्?

२. मृच्छकटिकस्य प्रथमाङ्के शकारचरित्रस्य वैशिष्ट्यं यथा चित्रितं तत्समासेन लिख्यताम्। 5

अथवा

मृच्छकटिकस्य प्रथमाङ्के दर्शितं विटचरित्रमवलम्ब्य संक्षिप्तो निबन्धो रचनीयः।



३. 'हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च' - अत्र कः वक्ता? उक्तेः किं तात्पर्यम्? अस्य वाक्यस्य अलंकारसमूह उल्लेखनीयः। $\frac{1}{2}+3+1\frac{1}{2}$

अथवा

"धिगस्तु खलु दारिद्र्यमनिवेदितपौरुषम्।

यदेतद्गर्हितं कर्म निन्दामि च करोमि च॥" -

कदा वक्ता इदमुक्तवान्? अनेन कथनेन वक्तुः मनोभावं कथं प्रकाशितं जातं तदेव सरलभाषया लेखनीयम्। 2+3